| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| अथ सामान्याभोज्यान्नभोजनम्। | त्र्यहोपवासः।<br>एतत् सकृदज्ञानविषयम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञाने प्राजापत्यम्।<br>क्षत्रियादीनां पादपादह्रानिः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| अभोज्यान्नानि यथा। अनधीतवेदारब्धयज्ञान्नम्। ग्रामयाजिहोत्रकयज्ञान्नम्। स्त्रीक्लीबहुतयज्ञान्नम्। मत्तक्रुद्धातुराणामन्नम्। केशेन कीटेन वा सह पक्वमन्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्रिणावलीढमन्नम्। शुनास्पृष्टमन्नम्। गवाघ्रातमन्नम्। घुष्टान्नम्। घोषणया दत्तमन्नमित्यर्थः। गणान्नम्। मठब्राह्मणसंघान्नमित्यर्थः। गणिकान्नम्। विद्वज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्षान्नम्। वार्द्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्य्यन्तं तद्यागकर्त्तुरन्नमित्यर्थः। कदर्य्यस्यान्नम्। रज्ज्वादिना बद्धस्यान्नम्। अयोनिगडयुक्तस्यान्नम्। अभिशस्तस्यान्नम्। क्लीबान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। छद्मना धर्म्मचारिणोऽन्नमित्यर्थः। शुक्तान्नम्। पर्य्युषितान्नम्। शूद्रोच्छिष्टान्नम्। चिकित्सकान्नम्। व्याधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रान्नम्। दारुणकर्म्मणो जातिविशेषस्य वा अन्नमित्यर्थः। स्तविकोद्देशेन पक्वमन्नम्। पर्य्याचान्तम्। आचमनव्यवहितान्नमित्यर्थः। एकपंक्तिस्थानन्यानवमन्य यत्रान्ने भुज्यमाने केनचिदाचमनं क्रियते तत् पर्य्याचान्तमिति कुल्लूकभट्टः। अनर्च्चितान्नम्। अर्च्चार्हस्यावज्ञया दत्तमन्नमित्यर्थः। वृथामांसम्। अवीरान्नम्। द्विषदन्नम्। नगराधिपान्नम्। | एतेषामभोज्यानामन्यतमानां भक्षणे पूर्व्वोक्तस्त्र्यहोपवासः। एष सकृदज्ञानविषयः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञाने प्राजापत्यम्।<br>क्षत्रियादीनां पादपादह्रानिः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |